S.V. Apte, English-Sanskrit Dictionary -- 3rd ed. Pune 1920



स्थूलता, मेदोवृद्धि *f*., स्फीति *f*. **-ty,** *a*. मांसल, मेदस्विन्.

**Fate,** *s* दैवं, भाग्यं, भागधेयं, दिष्टं, अदृष्टं, कर्मन् *n*., नियति *f*., प्राक्तनं, भवितव्यता; ' personified f. ' विधिः, विधातृ, कृतांतः, कालः; ' it is our f. to do wrong ' पापाचरणं दैवायत्तं-दैवाधीनं. **2** मृत्युः, नाशः, क्षयः, अंतः; गति *f*., परिणामः; ' he met with a sad f. ' शोचनीयः-कष्टः-तस्य अंतः समजायत; ' what was Sitâ's f. ' सीतादेव्याः किं वृत्तं ( U. 2 ); ' such has been the f. of your birth ' ईदृशस्ते निर्माणभागः परिणतः ( U. 4 ); ' ill-f. ' दुर्दैवं, मंदभाग्यं, दैवदुर्विपाकः- विपर्ययः-विपर्यासः. **-ed,** *a*. नियत, दैवनियुक्त, निर्दिष्ट, भवितव्य; ' whose f. time has come ' प्राप्तकालः; ' ill-f. ' दैवोपहत, दुर्दैव, मंदभाग्य; ' well-f. ' भाग्यवत्, धन्य, ससौभाग्य. **-Fatal,** *a*. प्राणहर, प्राणनाशक, जीवितापह, अंतकर, प्राणघातिन्, मृत्युजनक, दुर्विपाक, मर्मभेदिन्. **2** दैव ( वी *f*. ), नियत, दैवयुक्त, आवश्यक ( की *f*. ). **-ism,** *s*. दैवपरता, दैवाधीनता. **-ist,** *s*. दैवपरः, दैवायत्तः, दैवपरायणः, दैवाधीनः, यद्भविष्यः, दैवप्रमाणकः. **-ity,** *s*. प्राणहरत्वं; नियतिः, भवितव्यता, अवश्यकत्वं. **-ly,** *adv*. सनाशं, प्राणांतिकं; ' f. wounded ' तथा क्षतो यथाऽसंदिग्धो मृत्युः.

**Father,** *s*. पितृ *m*., जनकः, जनितृ-जनयितृ *m*., जन्मदः, तातः; ' f. and mother ' पितरौ, मातापितरौ, मातरपितरौ. **2** गुरुः, पूज्यः; ' f. in-law ' श्वशुरः; ' f. land ' जन्म-पैतृक-भूमि *f*. **-***v*. *t*. स्वीकृ 8 U, परिग्रह् 9 P. **2** आ-रुह् c. ( रोपयति ), निविश् c., ( with loc. ). **-hood,** *s*. पितृभावः-धर्मः, पितृत्वं. **-less,** *a*. अपितृक, तात-पितृ-हीन, अनाथ. **-ly,** *a*. तात-पितृ-तुल्यं, पितृनिर्विशेष; gen. by comp.; ' f. affection ' पितृवात्सल्यं. **-***adv*. पितृवत्, तातरूपेण.

**Fathom,** *v*. *t*. ( तलं or वेधं ) परीक्ष् 1 A, निरूप् 10, मा 3 A or c. ( मापयति ), व्यध् 4 P; ' f. another's thoughts ' मनः परीक्ष् or गाह् 1 A or निरूप्. **-***s*. व्यामः, व्यायामः. **-less,** *a*. अगाध, अतलस्पर्श, अनवगाह्य, अगम्यतल.

**Fatigue,** *s*. आयासः, क्लमः, श्रमः, अवसादः, खेदः, परिश्रमः, क्लेशः, ग्लानि-क्लांति-श्रांति-*f*., तंद्रा; 'inured to f.' श्रमसहिष्णु, जितश्रम. **-***v*. *t*. खिद् c., आयस् c., अवसद् c., क्लम् c. or श्रम् c. ( क्ल-श्र-मयति ), क्लिश् 9 P, ग्लै c. ( ग्ल-ग्ला-पयति ). **-ed,** *a*. श्रांत, क्लांत, खिन्न, ग्लान, अवसन्न, श्रमार्त, सश्रम, जातखेद-श्रम; ' to be f. ' श्रम् 4 P, क्लम् 1, 4 P, आयस् 1, 4 P, खिद् pass.

**Fatuous,** *See* **Foolish.**

**Fault,** *s*. दोषः, छिद्रं, अगुणः, अपराधः, पापं, प्रमादः, स्खलितं, वाच्यं, वाच्यता; ' find f. with ' दोषं ग्रह् 9 U, निंद् 1 P, उपा-लभ् 1 A, दुष् c. ( दूषयति ), ( नात्र कुलपतिर्दोषं ग्रहीष्यति S. 3 ); ' chase, though found f. with ' दृष्टदोषापि मृगया ( S. 2 ); ' f. finder ' दोषदृश्, दोषैकदृश्, छिद्रान्वेषिन्, दोषग्राहिन्, निंदक, पुरोभागिन्. **-y,** *a*. सदोष, सापराध, दोषवत्, दोषिन्, निंद्य, वाच्य, अवद्य, निंदार्ह. **2** अशुद्ध, असत्य, अयथार्थ, वितथ, अनृत, मिथ्या-अप-pr.; ' f. conclusion ' पक्षाभासः, अपसिद्धांतः. **-less,** *a*. अ-निर्-दोष, अनवद्य, निरपराध, दोषहीन, अपाप, अनघ, अकल्मष, निष्कलंक, विशुद्ध, निर्मल, पवित्र. **2** सत्य, यथार्थ, अवितथ.

**Faun,** *s*. वनदेवता.

**Fauna,** *s*. प्राणिजातं.

**Favour,** *v*. *t*. अनुग्रह् 9 P, उपकृ 8 U, प्रसादं-उपकारं-कृ 8 U, or दृश् c., साहाय्यं दा 3 P, अभ्युपद् 4 A; often by (*s*.); 'not inclined to f.' प्रसादपराङ्मुख; 'I wish to be f. ed with the mention of it' कथनेनानुग्राह्यमात्मानमिच्छामि ( Ka. 134 ). **2** अनु-पा c. ( पालयति ), अनु-मन् 4 A, अनु-मुद् 1 A, अनुकूलयति ( D. ). **3** आश्रि 1 U, आ-अव-लंब् 1 A, स्वीकृ, अंगीकृ. **-***s*. अनुग्रहः, प्रसादः, आनुकूल्यं, कृपा, प्रीति *f*., स्नेहः; ' he is in the king's f. ' स नृपप्रसादपात्रं-भाजनं. **2** आ-सं-श्रयः; साहाय्यं, नुपालनं, अभ्युपपत्ति *f*., आधारः. **3** हितं, उपकृतं-कारः, प्रियं, सुकृतं. **4** अनुज्ञा, अनुमति *f*.; 'in f. of ' पक्षे ( with gen. ) ' I am speaking in your f.' अहं त्वदनुकूलं ब्रवीमि, त्वत्पक्षं समर्थये; 'ask a f.' प्र-सद् c., उपकारं प्रार्थ् 10 A; ' seek the f. of ' आराध् c., अनुरंज् c. **-able,** *a*. अनुकूल, प्रसन्न, हितकारिन्, हितकाम, अनुग्रहपर, हित, हितबुद्धि, उपकारक; ' f. to ' आवह, उत्पादक in comp. **-ably,** *adv*. सानुग्रहं, सानुकूल्यं, प्रसन्नतया. **-ite,** *s*. प्रियः, प्रीति-स्नेह-पात्रं-भाजनं, वल्लभः. **-***a*. प्रिय, दयित, अभीष्ट, इष्ट, दयिततम, हृद्य, वल्लभ. **-itism,** *s*. पक्षपातिता, पक्षानुग्रहः.

**Fawn,** *s*. मृगशावः-वकः, मृगपोतः-शिशुः, हरिणवत्सः, कुरंगकः. **-***v*. *i*. ( upon ) चाटुवचनैः आराध् c. or तुष् c., साष्टांगपातं सांत्व् 10 or उप-लल् 10, उपच्छंद् 10, छंदं अनुवृत् 1 A or अनुरुध् 4 A. **-er,** *s*. चाटुकारः, सांत्ववादः. **-ing,** *s*. उपलालनं, चाटूक्तिभिः आराधनं, उपच्छंदनं, चाटुवचनं. **-ingly,** *adv*. चाटूक्त्या, स्तुतिपूर्वं.

**Fay,** *See* **Fairy.**

**Fealty,** *s*. अनुरागः, भक्ति *f*., निष्ठा, प्रभुभक्तिः.

Institute of Indology & Tamil Studies Cologne University Germany 9/1/2007